नं. ५०३८

राम मन्त्र पद्धतिः

x x x

पत्र. ६ सं.

✓ . तन्त्रम् .

𑆫𑆳𑆩𑆩𑆁𑆠𑇀𑆫𑆥𑆢𑇀𑆣𑆠𑆴𑆂

𑆥° 𑇓𑇗

5037

F = 6

ॐ अस्य श्रीराममंत्रो लिख्यते ॐ ब्रह्मा ऋषिः गायत्री छंदः श्रीरामो देवता रां
बीजं नमः शक्तिः मम सर्वैश्वर्य सर्वसौभाग्य सर्वलोकवश्य विद्याज्ञानसिद्ध्य
र्थे जपे विनियोगः रां हृन् रीं शिरः इत्यादि अंगानि अस्य वा मूलमंत्रस्य तैरेव
षडंगानि रानेमंत्रे रवकरं न्यासं च कुर्यात् अथ यांतरन्यासः ब्रह्मरंध्रे रां भ्रुवो
र्मध्ये म हृदि नाभौ गुह्ये हृल्के पादयोश्च प्रतिन्यस्य भावयेज्ज्ञानवान् सुधीः ध्यानम्
आधारे भावयेच्छक्तिं चिन्मयानंदरूपिणीं उद्यदादित्यसंकाशां मार्गेणैव सुभाम
यन् विद्युत्कोटिप्रतीकाशं चंद्रकोटिसुशीतलं सुषुम्णामार्गमुन्मील्य प्रा
पयेद्गुरूपदेशतः ब्रह्मा धनान नयेद्‌ द्वादशांते तु मंडलं प्राप्य विधिना तु प्या
पाययेत्तत्सुधामृतं ततः पारिंगलकुट्टस्थाधाराभिरामसुतम् निजदेहं जगत्सर्व
मेवीभूतं विचिंतयन् निष्प्रपंचनिराकारं ब्रह्मनिरंजनम् अस्थूलमसूक्ष्मं परमं सदस
द्भाववर्जितं ब्रह्मानंदमात्मानं भावयन् मुनिसत्तम इति ध्यानांतरम् उपसंहृत्य
मनो गोपयन् हृदि पंकजे रामं ज्योतिर्मयं ध्यानेन लोकैकसाक्षिणं जगद्रूप

ॐ रा॰प॰
२

ज्ञिसंपन्नि विपरीतकरं परं देवासुरमुनीन्द्रयोगिवृन्दैश्च सेवितं चतुर्भुजं शंखचक्र
गदापंकजधारिणं किरीटहारकेयूररत्नकुंडलशोभितं एवं ध्यात्वा जपेन्मंत्रं षड्
सहस्रं दिने दिने सर्वेषां श्रुतिमूलानां निम्नेने भिन्नकात्मनां कर्मणामविरोधेषु काले
भुजपद्ध्याने वाचः श्रियः पतिर्भूत्वा कविर्भवति वत्सरात् इति ध्यानान्तरम् यद्वा
कल्पतरोर्मूले सौवर्णमंडपं गते तन्मध्ये अष्टदलपद्ममुद्यदादित्यसन्निभं वीरासने
तन्मध्ये समासीनं महामुने सम्यग्ज्ञानमयीं मुद्रां दधानं दातिणे करे तेजः
प्रकाशिनीं वामजानुमूर्धनि न्यापरम जानकीवल्लभं देवं मिद्रनीलसमप्रभम् व्या
ख्यानतिरतं देवं द्विभुजं रघुनंदनम् वामभागे समासीनां सीतां कांचनसन्निभां भजतां
कामदां नित्यं नीलोत्पलकरांबुजां लक्ष्मणं पश्चिमे भागे धृतच्छत्रं सचामरं पार्श्वे भर
तशत्रुघ्नौ तालवृन्तकरावुभौ एवं ध्यात्वा जपेन्मंत्रं ज्ञालदं पापाघ्रभजनं चतुर्विधं कावे
वित्वं च परामर्शं जायतेन्तध्रुवम् जपन्तो मंत्रिणामेनमंतर्यागेन धीमता पुरश्च
रणक्रमेण विना च फलदो मनुः ध्यानान्तरम् कालांभोधरकांतिकांतमनिशं

वीरासनाध्यासिनं मुद्रां ज्ञानं दधि[illegible]दधानमपरं हस्तांबुजं जानुनि सीतां पार्श्व
गतां सरोरुहकरां विद्युन्निभां राघवं पश्यंतं मुकुटांगदादिविविधाकल्पो
ज्ज्वलांगं भजे श्रीरामायनमः इति मंत्रः अतःपरं प्रवक्ष्यामि घोरअरण्ये किंवि
धि जितेंद्रियो हविष्याशी शाक पावक भोजनः पश्चिमाभिमुखे देवे वृष
भे शिवालये नद्याः समुद्रगामिन्यास्तीरे गोष्ठे यवा गृहे अश्वत्थविल्वयो
मूले [illegible]सिंहनीनालाशये पर्वताग्रे अथवा मंत्री स्थाने वन्यतमे जपेत् द्वादश
लक्षं जपेत् दशांशेन तर्पयेत् तद्दशांशा विलंससिद्धि प्रजायते अनल्पफले स्नान
नकुसुमैः श्वेतमधुरसिक्तैर्हुनेत् पुरश्चरणार्थम् अथ कल्पोक्तरोगन्या
शविधिः सुद्रुमात्रकाकेषु वादिमात्रकानंत्यमूर्ति पंजरान् प्रागगोपालक
विधानोक्तान्यसेत् अथ पूजाविधिः तदर्थे यंत्रं वक्ष्ये [illegible] अथ ध्यानं महामंत्रं र
घुनंदनविग्रहं सौभाग्यदं वश्यकरं रिपुनाशकरं परं आयुरारोग्यदं पुंसां
सर्वज्वरनिवारणं यंत्रमंत्रमयं प्रोक्तं मंत्रात्मा देवता द्विजा पुरा भगवता पु

ओं रा-प-

२ [illegible]

क्रमेण संयोज्य नाहृये देहात्मनोर्यथाभेदो मन्त्रदेवतयोस्तथा तस्मात्पीठ महायन्त्रं
लिखित्वा तत्र पूजयेत् विना यन्त्रेण चेत्पूजा देवता न प्रसीदति ततो वक्ष्यामि यन्त्र
स्य स्वरूपं गुरुदर्शितं षट्कोणं पूर्वमालिख्य तद्बहिः अष्टपत्रमालिखेत् बहिरष्टदल
पद्मं ततः पार्थिवमण्डलं एवं मण्डलमालिख्य शोभनं भक्तियुक्तः षट्कोणान्त
र्लिखेद्बीजं साध्याख्यान्तरगर्भितम् कर्मगर्भितं मात्र्यैव बीजेन तद्बीजं वेष्ट
येत्ततः अग्न्यादिकोणषट्के तु षडङ्गानि च विन्यसेत् श्रीं ह्रीं इति लिखेत्पश्चात्
कोणस्य कपोलयोः कोणाग्रेषु हं बीजं केशरेषु स्वरान् मातृ ततो मातृकाम
र्णान्पूर्वादिष्वष्टदलेषु वर्गेषु समस्तमन्त्रमेव विन्यसेद्वस सं ख्यया सर्वाशिष्टं
तवर्णं विन्यसेदष्टमे दले हृन्नाकारेणतन्त्रं चेष्ट याकादिवर्णकैः बीजद्वयं
लिखेत्पश्चात् ... दिग्विदिक्षु च नारसिंहं महाबीजं वाराहं च मनुं ततः ।
अस्यार्थः प्रथमं षट्कोणं विलिख्य तन्मध्ये मन्त्रस्य प्रथमं बीजं रां इति विलि
ख्य तन्मध्ये साध्यनामादीन् विलिख्य पुनः कामबीजेन पूर्वं लिखितमन्त्रं

२

स्मरबीजं वेष्टयेत् पुनरवशिष्टेन मूलमंत्रवर्णपंचकेन तन्नकाम
बीजमपि वेष्टयेत् पुनर्वक्ष्यमाणेन रामदशाक्षरेण पूर्वलिखितं सर्वं वेष्टये
त् हुं जानकीवल्लभाय स्वाहा इति रामदशाक्षरीमंत्रः पुनः षडंगानि षट्सु को
णेषु एकैकं विलिख्य षट्कोणकपोलेषु हुं श्रीं ह्रीं मित्येकैकं कामिनीकपोले
एवं सर्वकपोलेष्वपि विलिख्य पुनः बहिरष्टदलपद्मं विलिख्य कमलकेसर
मध्ये नवषष्टिवर्णान् विलिखेत् तद्यथा ओं नमो भगवते रघुनंदनाय रक्षोघ्नवि
शारदाय मधुरप्रसन्नवदनायामिततेजसे बलाय रामाय विष्णवे नमः इति मं
त्रः एतेन मम चत्वारिंशद्वर्णात्मना मालामंत्रेण षट्संख्ययाष्टदलेषु वैवशिष्ट
वर्णपंचकं अष्टमे च विलिख्य तद्बहिर्वृत्तं विलिख्य तस्मिन् ककारादि क्षान्तैर्वेष्ट
येत् तद्बहिर्भूपुरं तत्कोणेषु शूलाग्रं विलिख्य [illegible] दिक्षु नारसिंहबीजं विलि
ख्य कोणेषु हं मिति वाराहीबीजं विलिखेत् [illegible] तत्सदृशे क्षौंकारः बिंदु
नादभूषितो मुनेनारसिंहो महामंत्रो भजेनां कल्पभूरुहः पंचमस्वरसंयुक्तो

रा॰प॰ हकारो बिंदुभूषितः तारा हबीजमित्युक्तं लक्ष्मीथनपराभवं एतद्यंत्रं समा
लिख्य सौवर्णे राजते पुटे भूर्जे वा सस्य गुरु मृत्तलि की हुरुम्पधारयेत ग्रयुक्ता
३ लभते पुत्रं ग्रथनो धनवान्भवेत् किमत्र बहुनोक्तेन सर्वाभीष्टं मदन्नुमां घटेम
नन्त मालिख्य धार्यानन्त्यागकोपङ्गम् दृष्टेवं यंत्रं विलिख्य तस्मिन्नवै स्वपीठं संपू
ज्य तदुपरि श्रीराममावाह्य उपचारैः समर्चयेत् सर्वमंगैः षट्कोणेषु समर्चयेत् पुन
म वामभागे सीतां [illegible] यजेत् तन्मंत्रस्य जनकऋषिः गायत्रीछंदः सीता श्रीर्देवता
श्रीसीतायै नमः इति मंत्रः इमं मंत्रं भार्यार्थी जपेत् इति देवस्य वामदक्षिणे ायजेत् उ
त्येप्रथमावृत्तिः तद्बहिरष्टदलेषु प्राग्दले हनुमते नमः अग्रेये ॐ हश्रीवाय नमः ॐ
भरताय नमः ॐ विभीषणाय नमः ॐ लक्ष्मणाय नमः ॐ अंगदाय नमः ॐ शत्रुघ्नाय नमः ॐ जांब
वते नमः इत्यवशिष्टे पुरुकमेणा सर्वे च प्रणवाद्या; समर्चनीयाः एवं द्वितीयावृत्तिः पुनरष्ट
दलए जयंताय नमः ॐ विजयाय नमः ॐ सुराष्ट्राय नमः ॐ राष्ट्रवर्द्धनाय नमः ॐ अकोथा
यनमः ॐ धर्मपालाय नमः ॐ सुमंत्राय नमः एतैरष्टभिस्तृतीयावृत्तिः इंद्रादिभिश्चतुर्थी ॥ ८३

वज्रादिभिः पंचमी अथयोगविधिः मधुहोमेनजुहुयात्प्रायसेनैववाप्नुत्रः कुबेरसहयो
लक्ष्माविद्ययाधिगत्यायेने अथश्रीराममंत्रप्रसंगात्मेवदेवताप्रकाशकोक्त श्रीरामव
शातरीलिख्यते दशाक्षरीमंत्रस्य वशिष्ठाऋषिः विराट्छंदः सीतायाः पाणिग्रहस
मर्थो: श्रीरामोदेवता क्लींबीजं स्वाहा शक्ति क्लीमित्यादिषडंगानि राज्येऽभिषिक्तान गर
विलसन्मंडपेरत्नभिन्नैजनन्नादिरास्थितस्तमनन्तसौरालोदिव्यागंधे नानादिव्यापधनपति
धनोदिव्यसिंहासनस्थ्यादिव्याकारैरनुजनिवहैः सेवितः स्वर्द्धमूले दिव्येमीस्रोटिवि
चस्तन्मन्त्रयामान सुरोघैः पंक्तिप्रोन्नेहठमुनिवरैर्वामदेवादिभिश्च यो कांचंद्रोपमि
न्तसुखदः श्यामलश्रीबालस्याध्येयः सिद्धोविश्वविनमहाराजराज्याभिषेकः ॐ
ह्रें जानकीवल्लभायस्वाहा अथाक्षरन्यासः मूर्ध्नि भाले भ्रुवोर्मध्ये आस्ये कंठे हृदि नाभौ
गुह्ये जानुपादयोरक्षरन्यासः तत्त्वकोमव्यापाक न्यासः षडक्षरोक्तविधिना पूजयेत
लक्षं पुरश्चरणजपः अथप्रयोगः जातीपुष्पैर्जुहुयाद्वदन्नाभः समृद्धिनैः जल
वषपाय कमलैर्धनधान्यादि संपदे नीलोत्पलानां होमेन वशयेदखिलं जगत

बिल्वब्रह्मनैर्जुहुयाद्दिव्सारामपसायेनरः दूर्वाहोमेनदीर्घायुर्मवेन्मंत्रीनिरामयः रक्तोत्पलैर्भवेन्मं
त्रीधनमान्मोनिवो ध्रुवं मेधाकमेनहोमकर्म पलाशकुसुमैर्नवैः वश्यमममः प्रथिवेन्फलैर्भ
वनिवन्सारान् नन्मेविनाजंमुजीजमर् [illegible] कदारोग्यमाप्नुयात् अथसीतारामममंत्रः रघवछंके
षिः जगनिछंदः सीतारामदेवता श्रींवीजं स्वाहाशक्तिः ॐ क्लीं हृदय श्रींश्रींशिरः रारा
मायनमः शिखा श्रीसीतायैस्वाहाकवचं श्रींश्रींनेत्राभ्यां क्लीं ॐ अस्त्रं नमावायदम्भो
विदेहतनयायोरामांकपीठस्थितानांतरुःकोदारामनपरामभिमिर्पातितातस्थितापद्मोत्पलाम्
रामंदाशरथिंरमाकुञ्चलसंकुलंनदासेतग्रिकल्सूरीरंवनस्वदलिपाकरेध्यायेद्भी
ष्टामध्ये प्रणवंमान्सर्घवीजं लक्ष्मीवीजद्वयंतथा राममंत्रषडर्णवसीतांमंत्रषडान्नरान्
अग्निवीजंनतः पश्चाद्रमावीजद्वयंतथा कामवीजंननः पश्चान्मप्रणांवेणषुट्कमात् सी
तारामममहामंत्रं जपेद्धाब्धिमाप्नुयात् ॐ क्लींश्रींरारामायनमः श्रीसीतायैस्वाहा रांश्रीं क्लीं ॐ
इतिमंत्रः एकविंशनिवर्णोयंभुक्तिमुक्तिपदोन्तृणां षडत्तरोक्तवीजायद्यआदिके अथयन्
त्रम् षट्कोणंसर्वमालिख्यजटगेहन्नमालिखेत् वहिरष्टदलंपद्मरामममात्सोमलिखेत् क्रमात्

पूर्वादिदलपर्यंतंस्ववर्गामेवविलिष्टकं षोडशार्णान्बहिर्लिखित्वातद्बहिः प्रणवंलिखेत् षट्को
णाग्रमध्येश्रीरामंलक्ष्मीवीजेनवेष्टयेत् एवंमुद्रारूपविधिवन्मुद्रावद्धंप्रदर्शयेत् गंधपुष्पा
दिधूपैश्चदीपैर्नैवेद्यमेवच एवंकुर्वीतनावैलिख्य मनिमानरामसायुज्यमाप्नुयात् अस्या
र्थः प्रथमंषट्कोणंविलिख्यतन्मध्येरामवीजंविलिख्य नानिबीजानिप्रत्येकंश्रीवी
जेनवेष्टयेत् वहिरष्टदलंपद्मंविलिख्यतस्मिन् ॐनमःसीतापतयेरामायहनहनहुंफ
डितिरामषोडशाक्षरीमंत्रेणवेष्टयेत् तद्वहिःप्रणवेनवेष्टयेदिति अथश्रीरामद्वादशा
क्षरीमंत्रस्यअगस्त्यऋषिः गायत्रीछंदः श्रीरामचंद्रोदेवतारांबीजंश्रीशक्तिः ॐहृत्॥
श्रींशिरः भरताग्रजरामशिखाक्लींकवचंस्वाहा अस्त्रंध्यानंपूर्ववत् ॐश्रींभरताग्रजराम
क्लींस्वाहा इतिमंत्रः श्रीरामषोडशाक्षरीमंत्रस्यागस्त्यऋषिर्बृहतीछंदः श्रीरामोदेवता
ॐबीजं रांशक्तिः मूलमंत्रपदैः षडंगानिध्यानंपूर्ववत् ॐनमःसीतापतयेरामायह
नहनहुंफडितिमंत्रः श्रीरामद्वात्रिंशदक्षरीमंत्रस्यागस्त्यऋषिः अनुष्टुप्छंदः श्रीरामो
देवता ॐबीजं श्रींशक्तिः मंत्रपादैर्न्यासः समस्तेनपंचांगानिध्यानार्चनादिपूर्ववत्॥

ॐ रामभद्रमहेष्वासरघुवीरनृपोत्तमदशास्यांतकमांरक्षश्रियंमेदेहिदापय इतिमंत्रः अ
ॐ रा० प० ष्टादशाक्षरीमंत्रोत्तरं अकऋषि अनुष्टुपछंदः श्रीरामोदेवता रांबीजं आद्येतिशक्तिः
५ पादचतुष्टयेनसमस्तेनचपंचांगानि ध्यानादिप्राग्वत् ॐनमोब्रह्मण्यायदेवायरामा
याकुंठतेजसे उत्तमश्लोकधुर्यायन्यस्तदंडार्पितांघ्रये इतिमूलमंत्रः लक्षंजपः
साज्यपायसेनहोमदशांशं अथमंत्रान्तरं अगस्त्यऋषिः बृहतीछंदः श्री
रामोदेवता ह्रींबीजं नमः शक्तिः ॐह्रींश्रीह्रांदाशरथायसीतावल्लभायत्रैलो
क्यनाथायनमः त्रयोविंशत्यर्णः ध्यानादिप्राग्वत् राममंत्रप्रसंगाल्लक्ष्मणादिमं
त्रा लिख्यंते. लक्ष्मणमंत्रस्यागस्त्यऋषिः गायत्रीछंदः लक्ष्मणोदेवता लंबीजं
नमः शक्तिः ममपुरुषार्थचतुष्टयेविनियोगः द्विभुजंस्वर्णरुचिरतनुंपद्मनिभेक्ष
णं धनुर्बाणधरंरामसेवासंसक्तमानसं लंलक्ष्मणायनमः इतिमंत्रः भरतशत्रु
घ्नमंत्रयोरपिऋषिछंदेपूर्ववत् भरतशत्रुघ्नौदेवते ॐभंभरतायनमः शंशत्रु
घ्नायनमः इतिमंत्रः हनुमान्मंत्रस्यईश्वरऋषि अनुष्टुप्छंदः हनुमान्देवता ह्रौंबीजं नमः

शक्तिः संकीलकं ममहनूमत्प्रसाद सिद्ध्यर्थे जपे विनियोगः ॐनमोभगवतेआंजनेया
यहृदय रुद्रमूर्तयेशिरः वायुसुतायशिखा अग्निगर्भायकवचं रामदूतायनेत्रं ब्रह्मास्त्र
निवारणायअस्त्रं ऐवंकरन्यासः स्फटिकाभंस्वर्णकांतिंद्विभुजंचकृतांजलिं कुंडल
द्वयसंशोभिमुखांभोजंभजे ॐह्रींनमोभगवन्प्रकटपराक्रमः आक्रांतदिग्मंडलय
शोवितानधवलीकृतजगत्त्रितयवज्रदेहरुद्रावतारलंकापुरीदहनउदधिबंध
नदशग्रीवकृतांतकसीताश्वासनअंजनागर्भसंभूत ... वराम लक्ष्मणानंदकरक
पिसैन्यप्राकारकसुग्रीवसाहाय्यपर्वतोत्पाटनबालब्रह्मचारिन्गंभीरशब्दसर्वग्रहविना
शनसर्वज्वरोत्सादनडाकिनीविध्वंसॐ ॐह्रींहाहाहाहंसएव ह्रैं सर्वविषहरःपरब
लंदोभय २ ममकार्याणिसाधय २ हुंफट्स्वाहा इतिहनूमन्मालामंत्रः एतान्लक्ष्म
णादिमंत्रान्राममंत्रो गत्वेनयथाशक्तिजपेत् इतिपद्धतीशुभम्

6

प्रत्यादिकोशगतमूलमन्त्रस्य षडङ्गानि

सं॰ ५॰ ३६

पत्रे॰ ६